# Shivaproktam Chidambarakshetravarnanam

# શિવપ્રોક્તં ચિદમ્બરક્ષેત્રવર્ણનમ્

## Document Information

Text title : Shivaproktam Chidambarakshetravarnanam

File name : shivaproktaMchidambarakShetravarNanam.itx

Category : shiva, shivarahasya, raksha, tIrthakShetra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 24| 1-29.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં ચિદમ્બરક્ષેત્રવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
- શિવપાર્તવતીસંવાદે -
શ્રીશિવઃ
ચિદમ્બરાભિધં ક્ષેત્રં શિવક્ષેત્રમનુત્તમમ્ ।
તદપ્યેકં મહત્સ્થાનં મમ પ્રિયકરં શિવે ॥ ૧॥

વસામિ તત્ર સતતં બ્રહ્મવિષ્ણ્વાદિપૂજિતઃ ।
તત્ર માં મુનયઃ સર્વે સેવન્તે પ્રત્યહં શિવે ॥ ૨॥

તસ્મિન્નેવ શિવસ્થાને કોટિશઃ સન્તિ શાङ્કરાઃ ।
તત્ર રમ્યાણિ તીર્થાનિ સન્તિ પાપહરાણિ ચ ॥ ૩॥

રુદ્રાક્ષવનમસ્ત્યેકં તત્ર પાપભયાપહમ્ ।
તત્ર બિલ્વવનં ચાસ્તિ સર્વદા નવપલ્લવમ્ ॥ ૪॥

નિત્યં શિવકથાલાપાઃ જાયન્તે તત્ર વલ્લભે ।
શિવૈકશરણા એવ તત્ર સન્તિ મમ પ્રિયાઃ ॥ ૫॥

સદા મદાસક્તચિત્તાઃ સદા મત્પૂજનપ્રિયાઃ ।
સદા મદેકશરણાઃ સદા મદુપપાદકાઃ ॥ ૬॥

કેચિદ્વદન્તિ મામીશં ગૌરીનાથેતિ સાદરમ્ ।
ગૌરીનાથેતિ નામ્નૈવ પૂજયન્તિ મુહુર્મુહુઃ ॥ ૭॥

કેચિદ્વદન્તિ મામીશં શિવેત્યનિશમાદરાન્ ।
તન્નામ્નૈવ નમઃ પૂર્વં બિલ્વૈરભ્યર્ચયન્તિ મામ્ ॥ ૮॥

કેચિદ્વદન્તિ મામીશં શङ્કરેત્યનિશં મુદા ।
તન્નામ્નૈવ નમઃ પૂર્વં બિલ્વૈરભ્યર્ચયન્તિ મામ્ ॥ ૯॥

કેચિદ્વદન્તિ મામીશં ચન્દ્રચૂડેતિ સાદરમ્ ।

તન્નામ્નૈવ નમઃ પૂર્વં બિલ્વૈરભ્યર્ચયન્તિ મામ્ ॥ ૧૦॥

કેચિદ્વદતિ મામીશં વિશ્વનાથેતિ સાદરમ્ ।
તન્નામ્નૈવ નમઃ પૂર્વં બિલ્વૈરભ્યર્ચયન્તિ મામ્ ॥ ૧૦॥

કેચિદ્વદન્તિ મામીશમુમાનાથેતિ સાદરમ્ ।
યાવન્તઃ સન્તિ વિપ્રેન્દ્રા નિત્યં શ્રીમચ્ચિદમ્બરે ॥ ૧૨॥

સર્વે વદન્તિ તે નિત્યં મહાદેવ શિવેતિ ચ ।
મન્નામચિહ્નિતાઃ સર્વે સન્તિ શ્રીમચ્ચિદમ્બરે ॥ ૧૩॥

મન્નામામૃતપાઃ સર્વે શ્રીચિદમ્બરવાસિનઃ ।
શ્રીમચ્ચિદમ્બરે તીર્થે યાવન્તઃ સન્તિ સાધવઃ ॥ ૧૪॥

તાવન્તોઽપ્યર્ચયન્ત્યેતે મન્નામામૃતપાયિનઃ ।
અમિતાઃ સન્તિ શૈવેન્દ્રા નિત્યં શ્રીમચ્ચિદમ્બરે ॥ ૧૫॥

ચિદમ્બરસ્થશૈવાનાં ન સઙ્ખ્યા વિદ્યતે શિવે ।
શિવગઙ્ગાભિધં તીર્થં તત્રાસ્ત્યેકં વરાનને ॥ ૧૬॥

તત્ર સ્નાત્વા નરઃ સદ્યો મુચ્યતે પાપકોટિભિઃ ।
આદ્રાયાં પાતયુક્તાયાં તત્ર સ્નાત્વા યથાવિધિ ॥ ૧૭॥

દત્વા સુવર્ણં શૈવાય મુચ્યતે ભવબન્ધનાત્ ।
શિવગઙ્ગાતટે રમ્યે નાટ્યસ્થલમુમેઽસ્તિ મે ॥ ૧૮॥

તત્ર નાટ્યં મયા દેવિ ક્રિયતે તવ સન્નિધૌ ।
શ્રીમદભ્રસભાનાથં નૃત્યન્તં માં મહેશ્વરં (નટેશ્વરમ્) ॥ ૧૯॥

બ્રહ્મવિષ્ણ્વાદયો દેવાઃ સેવન્તે પ્રત્યહં શિવે ।
નૃત્યન્તં મામુમે નિત્યં મહાતાણ્ડવનાયકમ્ ॥ ૨૦॥

દૃષ્ટ્વૈવ દૂરતો દેવાસ્તિષ્ઠન્તિ ભૃશકમ્પિતાઃ ।
સ્વર્ગાદિકાન્સપ્ત લોકાન્ભૂરાદીનખિલાનપિ ॥ ૨૧॥

સમાવૃત્ય મયા તત્ર કૃતં નૃત્યં મનોરમે ।
તત્ર લિઙ્ગ મમાસ્ત્યેકં શ્રીમદભ્રસભાસ્થલે ॥ ૨૨॥

તદ્વિલોકનમાત્રેણ ન પુનર્ભવબન્ધનમ્ ।
આર્દ્રાયાં તસ્ય લિઙ્ગસ્ય દર્શનં યઃ કરિષ્યતિ ॥ ૨૩॥

સ મહાપાપરાશિભ્યો મુચ્યતે નાત્ર સંશયઃ ।
યન્મે મૂલેશ્વરં લિઙ્ગં મૂલસ્થાના (નાથા) ભિધં શિવે ॥ ૨૪॥

યન્મૂલં સર્વજગતામુત્પત્યાદેશ્ચ કારણમ્ ।
મૂલસ્થાનેશ્વરં દૃષ્ટ્વા પાતાર્દ્રાસોમવાસરે ॥ ૨૫॥

બિલ્વપત્રૈઃ સમભ્યર્ચ્ય મદ્રૂપં પ્રાપ્નુયાન્નરઃ ।
મૂલેશ્વરં સમભ્યર્ચ્ય જપ્ત્વા પઞ્ચાક્ષરં તતઃ ॥ ૨૬॥

રુદ્રાધ્યાયં ચ જપ્ત્વાન્તે મમ સાયુજ્યમાપ્નુયાત્ ।
તત્ર દ્વાદશસાહસ્રં જપ્ત્વા પઞ્ચાક્ષરં શિવે ॥ ૨૭॥

બ્રહ્મહત્યાદિપાપેભ્યો મુચ્યતે નાત્ર સંશયઃ ।
તત્ર યન્નિષ્કમાત્રં વા સુવર્ણં સોદકં શિવે ॥ ૨૮॥

યો દદ્યાચ્છિવભક્તાય સ મુક્તો ભવતિ ધ્રુવમ્ । ૨૯.૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તં અરુણાચલક્ષેત્રવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૪। ૧-૨૯.૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 24 . 1-29.1..

Notes:

Śiva શિવ tells Pārvatī પાર્વતી about the Cidambarakṣetra ચિદમ્બરક્ષેત્ર that has a Rudrākṣa forest રુદ્રાક્ષવન and a Bilva forest બિલ્વવન; and is inhabited by several Śāṅkarā-s શાઙ્કરાઃ. He highlights the merits of bathing in the Śivagaṅgā શિવગઙ્ગા located there, especially during Pātayukta Ārdrā પાતયુક્ત આર્દ્રા.

Along the banks of Śivagaṅgā શિવગઙ્ગા is His Nāṭyasthala નાટ્યસ્થલ where He conducts His Tāṇḍava તાણ્ડવ as SrīmadAbhraSabhānātham શ્રીમદભ્રસભાનાથમ્, along with Devi દેવિ. He is worshiped there by Brahmā બ્રહ્મા, Viṣṇu વિષ્ણુ et al, and is known there as MahāTāṇḍavaNāyakam મહાતાણ્ડવનાયકમ્.

SrīmadAbhraSabhāsthalam શ્રીમદભ્રસભાસ્થલમ્ has a Śivaliṅga શિવલિઙ્ગ, that should be worshiped especially during Ārdrā આર્દ્રા; while the Mūleśvaraliṅga મૂલેશ્વરલિઙ્ગ / Mūlasthāneśvara મૂલસ્થાનેશ્વર should be visited during Pātayukta Ārdrā પાતયુક્ત આર્દ્રા especially of Somavāra સોમવર.

He mentions about the merits of Rudrādhyāya japa રુદ્રાધ્યાય જપ and twelve thousand recitations of Pañcākṣara mantra પઞ્ચાક્ષર મન્ત્ર.

Proofread by Ruma Dewan

*Shivaproktam Chidambarakshetravarnanam*
pdf was typeset on June 17, 2024

Please send corrections to *sanskrit@cheerful.com*